कं कुलहृल्लात ॥ परिधूर्वंति गताः त्राणि वासोलंकारचंदने ॥ अत्र न सम्यक्त्वेण निहिताधीरावल
यो नः स्फुरति तो नूवरीनुंताः स्वगात्राणि मंडयन्तीति व्यंग्यमस्फुटं ॥ अगूढं यथा ॥ उत्कीर्णनी

त्यादि ॥ अत्र पिबंतीति सादरावलोकोल्लस्यस्तस्य गम्यत्वासक्तिर्व्यंग्या सा च वाच्यवत्प्रकाशादगू
ढेव ॥ इतरांगं यथा ॥ कांतं प्रवोंते स्वनते सुदीर्घ्य पादांगुलीयानि पदांगुलीषु ॥ समर्प्ययंती सु
मुखी वयस्यां लीलांबुजेन प्रजहार तन्वी ॥ अत्र हास्यस्य शृंगारांगं ॥ वाच्यसिद्ध्यंगं ॥ यथा ॥ नी
चीदाच्युत गच्छामि किमत्र तव वीक्षया ॥ इत्यामंत्रणे भावज्ञः सस्वजे युवतिं हरिः ॥ अत्राच्युतेत्या
दिपदं संगमात्रेणेत्यादिवाच्यसिद्ध्यंगं तद्व्यपादकत्वात् ॥ एवमन्येपि भेदा बोध्याः ॥ इति काव्य
कौस्तुभे मध्यमकाव्यनिर्णयो ष्टमी प्रभा ॥ अथ कनिष्ठकाव्यमाह ॥ अव्यंग्यं तु कनिष्ठं स्यात्काव्यं शा
ब्दार्थचित्रितं ॥ स्फुटव्यंग्यरहितं काव्यं कनिष्ठं ॥ तच्च शब्दालंकारयोगाच्छब्दचित्रं ॥ अर्थालंका
रयोगादर्थचित्रमिति द्विविधं ॥ अथालंकाराणां लक्षणं ॥ शब्दार्थवर्त्तिनः संतं रसमुत्कर्ष वर्द्धयंति ५
यंति ये ॥ तेलंकारा यथात्मानं देहस्थाः कंकणादयः ॥ यथा कुंडलादयः शरीरशोभातिशायि
नः शारीरिणमुपकुर्वंति तथानुप्रासोपमादयः ॥ शब्दार्थशोभातिशायिनः संभविनं रसमुप उत्कर्षकाः २
कुर्वंतीत्यलंकारास्ते ॥ तेषु शब्दालंकारानाह ॥ वर्णसाम्यमनुप्रासः पूर्वसंस्कारबोधकृत् ॥ असं
युक्तसंयुक्तरूपस्यानेकस्य व्यंजनस्य सकृत्साम्यं छेकानुप्रासः ॥ एकस्यासंयुक्तसंयुक्तरूप

एकवारेण ॥ छेको विदग्धः ।

लाटे ऽविदग्धः

काव्यकौ० स्थानेकस्य स्वसृंजनस्यासकृत्साम्यं हृत्यनुप्रासः ॥ क्रमेणोदा० ॥ जहार हरिणाक्षीयं कुंदं दुमधु
२४ रैः स्मितैः ॥ कुंडलोज्ज्वलगंडश्री हृदयं विदयं मम ॥ कुमारकवचेनारस्तु सारः संप्रति चेता
सि ॥ विजगनशरवन्मग्नो लग्नो ह्येन लिकिमकुतं ॥ शब्दसाम्यं च सप्रोक्तो भेदे तात्पर्यमात्रतः
शब्दानां शब्दस्य वा साम्यं लाटानुप्रासः ॥ शब्दार्थयोरभेदेपि तात्पर्यमात्रात् भेदे सतीमम
कान्दे ॥ क्रमेणोदा० ॥ नार्चितो येन गोविंदस्तस्य तीर्थाटनेन किं ॥ अर्चितो येन गोविंदस्तस्य ती
र्थाटनेन किं ॥ अत्र भगवद्विमुखस्य तीर्थाटनादपि न किंचित्फलं तत्संमुखस्य तु तेन विना
पि तत्फलमस्तीति तात्पर्यभिदां धत्ते ॥ तारुण्ये च स्मिते पुंसि तरुणी वत शर्करा ॥ शर्कराक
नु माधुर्यमीदृशं जनयंते तरां ॥ इह प्रथमं शर्करापदं विधेयपरं द्वितीयं त्वनुवादपरं ॥ भि
न्नार्थानां सतस्वर्णस्वरव्यंजनसंहतिः ॥ क्रमेण तेन चेत्स्थाने द्वावृत्तिं यमकं तथा ॥ यद्यर्थः सं
भवेत्तदा द्वौ वर्णसंघौ भिन्नार्थकौ ॥ यदि न संभवेत्तदा द्वावपि व्यर्थौ ॥ एकतरार्थवत्वे तु सा
र्थव्यर्थौ चेति भूरि भेदं यमकं ॥ उदा० सुरसार्थभूषितपदैरत्नाद्रिभिरधिकभक्तिसंनम्रैः
सुरसार्थभूषितपदैः स्तवैः स्तुतः कश्चिदाजयति ॥ अत्र द्वौ सार्थौ ॥ कुसुमराजि विराजि

विभक्त्योर्णयोः स्यादेनु धावपितुस्मर्थौ ॥ आपाता शारदाहो शारदाहो मान्मथः शरवुरः ॥ सरतिः सरः कल
हंसीकहल्लहंसीमंतिनी स्वजनि ॥ अत्र साधैर्य च सोर्थभिन्नौ चेति ॥ यो नरूढ्याव नसश्चेद्दृष्टस्या
त्ततो नवेत् ॥ पुनरुक्तवदाभासं स्नदास्याद्भिन्नशब्दगः ॥ विभिन्नाकारसभंगाभंगशब्दनिष्ठः
उदा· ॥ अबला स्त्री रिपुः शत्रुः हस्ताद्बुधा सोम्या न्न शङ्कते ॥ ३ ॥ श्लेषो यत्र पदैः श्लिष्टैरनेकार्थो
भिधीयते ॥ वर्णादिश्लेषणादेष तद्भावाच्च संभवेत् ॥ यथा ॥ विधौ विरुद्धे हरितः प्रसादं
नोपभुंजते ॥ अत्र विधौ विधुकारेकारयोः श्लेषणं ॥ हरित इति विभक्त्योः दयितासि ममेत्या
सीताराघवयोर्वचः ॥ अत्र दयितेति प्रत्यययोः दृष्टिं तद्धातोर्बुद्धिर्विधमादाय यथाध्ययः ॥ अ
त्र दधत इति प्रकृत्योर्वचनयोश्च ॥ विधुमादाय इति लिंगयोश्च ॥ चमूरुव सति नीतिमधुरैषा
यथाटवी ॥ अत्र चमूविति पदयोः ॥ वर्णादिश्लेषणाभावेपि यथा ॥ नून्नं नितंबसंसर्गा
न्मादिनी मुदिता वनौ ॥ अत्र प्रकरणादिसन्निधानियमनाभावादर्थद्वयं वाच्यं ॥ अत्रैको
भिधेयावाध्यः परस्तत्सदृशयानिरूढलक्षणयेति ॥ एष शब्दश्लेषः सभंगाभंगतया
द्विविधः ॥ प्रागुक्तलक्षण एव गंतव्यः ॥ नन्वभंगोर्थश्लेषः स्याद्द्वयोस्तत्र श्लेषणात् ॥

काव्यको॰ मेवं ॥ अर्थ्रेनेदं श्लेशशब्दनेदं स्वीकारात् ॥ तस्माद्यत्र शब्दपरिवृत्त्यौ श्लेषत्वं मन्यते स शब्द
श्लेषः ॥ यथा विधाविव्यादिकः यत्र तन्न भजते स त्वर्थश्लेषः ॥ हारबंधो यथा ॥ कुरुतरु यथा संताप
२५ णिरुषनोपतापप्रपन्नो भजनिजविजनं तारहारस्फुरंती ॥ स्तनेकनकनगो शातपातप्र हर्त्ताहारि रंबुद
तप्तां तनुमतुलतनुत्तां माव शावल्यवत्तां ॥ खड्गबंधो यथा ॥ वीणावाली सुंदरीवृंदमुख्या ख्या श्चेति धहाराया
ता सङ्गिल्लसल्लोलः कुंजेद्वीवीक्षां चक्रे माधवं त्राव सारा रासो त्नो मा त्वा कापि तं कुत्स्ने नीवी ॥ क कारहेतुत्वेबुले
पाटबंधो यथा यथा ॥ स्मरापघनाशिनामुरंजरान राति साद्दनं ॥ मुरारिनाम मामावरं परावरा नोचित्रमुच्यते
त्मसाधनं ॥ त्वमामुत्रिकाश्च गतिश्च ॥ चक्रबंधो यथा ॥ गंधाढ्यकरूदगुरून्मदात्तिनिवह हारबंधोयथा ॥ २
हारभ्रमांतिलुतं संघुष्टं तमुपस्कृताध्वनि यमीवीचीष्विया रंजकं ॥ सद्यास्तुगितविचित्रमंसु
निन्नंतेसीता निल्लेः मोरम्य द्देवं नागयुजं सहारसमयं तं नौमि कंचिन्मुदे ॥ स्त्व्यकविना
पद्मबंधोयथा ॥ ३ मगर्न्नचक्रं ॥ कलयायसदालोककल्लोहारमिला बकं ॥ कवल्लाधाङ्कतानूककन्नूता नी
रधात्मक ॥ ५ ॥ वक्रोक्तिः श्लेषकाकुभ्यां मन्यार्थ्यो यदि कल्प्यते ॥ राधेत्वं कुपिता त्वमेव कुपि
ता स्त्वष्टासि त्वमेर्यता मातात्वं जगतां त्वमेव जगतां माता न विज्ञोपरः ॥ देवि त्वं परिहासकेलि

श्रौत्रेतित्रोषः क्रमेणोद्दार

कलहंदनं तालमेवत्यसोस्मेरोवह्नवसुंदरीमवनमनशौरिः श्रियं वः श्रियात् ॥ अत्र कुपि
तेति संज्ञो गणेश्लेषणमातेति त्वन्नेगालो ॥ यथा वा जवित्रीरंजोरु त्रिदशवदनग्लानिर
धुना सते रामः स्थाता न युधिपुरलोलक्ष्मणेसरवः ॥ इयं यास्येतु सुर्वे विपदमधुना वानर
चमूर्लंघिष्टसष्टासारपरविलोपानयत्पुनः ॥ अतसीकुसुमश्यामशतसीमंलिनीष्ट
तं ॥ सतत्वं कृष्णमालोक्य हृदयं न विदूयते ॥ अत्रैकस्यानिवैर्थप्रयुक्तोनत्रयपरस्यानुवि
धोपघटितः ॥ भाषाश्लेषणं यत्र तद्भाषासमकं मतं ॥ एकविधैः शब्दैर्विविधाभाषायदि
निवध्यते तद्भाषासमकं नाम ॥ उदा० ॥ मंजुलमणिमंजीरे कलगंभीरविहारसरसीती
रे ॥ विरसासि केलिकीरकिमालिधीरे च गंधसारसमीरे ॥ अत्र संस्कृतप्राकृतसौरसेनी
प्राच्यवंत्यादिभिरेकविधः श्लेषः स्यात् पिलासरकिंचिद्दलाचान्यत्रैकाश्यते ॥ अन्यो
प्यत्र लक्ष्याकुष्णुतद्वाक्षारं बुधाः यथा ॥ कूजंति कोकिलाः सालेयौवने फुल्लमंबुजे ॥ किंक
रोतु कुरंगाक्षी वदनेन निपीडिता ॥ अत्र रसा सालइति चक्रसे सालइति रक्षतः ॥ वनरु
सत्र यौवन इति योर्दिनः ॥ वदनेति मश्रुतेवशा ॥ यथा वा ॥ पूर्णचंद्रमुखी रम्या कामिनी नि

मेलांवरा ॥ करोति कस्य न स्वान्तमेकान्तमदनोत्सवं ॥ अत्र पदच्युते केदन्ते कामिनीति ॥ अन्यो
ऽपि विस्फुटं यत्र बिंद्वादिप्रच्युतावपि ॥ प्रतीयते बिंदुः मात्रा द्विंदुःच्युतकादिकं ॥ यथा ॥
सुंदरि बिंदुच्युतके तव नैपुण्यं वयं व पुण्येन ॥ शशमुखि वशीकृता न दृशी ममयत्वया
त्वरया ॥ अत्र त्वदधीनामेवं शीतिस्फुटमपरोर्थः ॥ मंदैः कल्पापिनामेते पक्षिणां धर
णीरुहः ॥ विरुतैः स्वागतानीव कारितानात्युतन्वते ॥ इह मंदैरिति विसर्गच्युतमंदैः क
लापिनामिति ॥ एवं वर्णच्युतकादिकमूह्यं ॥ नलस्यते स्फुटं यत्र पदसंधानकौशलात्
स्मृतं यथा ॥
क्रियादिसदृशिष्टाज्ञैः क्रियागुप्तादि तत्स्फुटं ॥ पांडवानां सभामध्ये दुर्योधन समाग
तः ॥ तस्मै गां च सुवर्णं च सर्वाण्याभरणानि च ॥ अत्रादुरिति क्रियागुप्तिः ॥ वटहंसो महा
न्नेष मार्गमाहत्य तिष्ठति ॥ तावत्वयानगंतव्यं यावन्नान्यत्र गच्छति ॥ ह्ववटा ॥ एषमहान्त
दृइति संधिसंबोधनयो ॥ माधवस्य पुरो व्यासां साध्वीनां व्रजसुभ्रुवा ॥ राजते वदनेनत्वीना
पिसत्प्रियचेतसां ॥ अत्रेमतिकर्तृः साकं सखीभिरागत्य कानने स्मिन्दिने दिने ॥ उत्काष्ठु
त्कायमेरानिराधा वामनयावता ॥ अत्राकमिति कर्मणः ॥ इति पंकमप्यसर्व्वकासारदुः खिता

ऽमी ॥ दुर्वारा मानसं दृष्ट्वा सागमिष्यति घनागमे ॥ अत्र दुर्वारेति करणस्य ॥ एवं संप्रदानादयः ॥
१० ॥ एते शब्दालंकाराः ॥ अर्थालंकाराः ॥ उपमानमेययोः साम्यं वाच्यं वा क्वचिदेकगं भवेत्
द्वयोः सादृश्यमुपमा भवेत् ॥ तस्मात् सादृश्यं यदि वाच्यमेकवाक्यगतं च स्यात् ॥ रूपकादौ सादृ
श्यं गम्यं ॥ अनन्वये एकस्यैव सादृश्यं ॥ उपमेयोपमायां वाक्यद्वयगतं स्वान्योन्यस्यापि नेदृश।
तो विभजति ॥ पूर्णा च द्रुपमेयादि चतुष्कं शाब्दमीरितं ॥ उपमेयं मुखादि उपमानं पद्मादि ॥
साधर्म्यं गुणक्रियाकृतं माधुर्यविकाशादि क्वचित् ष्टमात्रकृतं च ॥ वाचकस्तु यथेवादि ॥
एषु चतुर्षु शब्दोपात्तेषु पूर्णोपमोच्यते ॥ श्रौती यथादिभिर्योगादिवार्थवतिना च सा ॥ आ
र्थी समादिभिर्योगात्तुल्यार्थवतिना तथा ॥ यथेव वा वार्थवतयोः श्रुत्यक्षता एव साधर्म्यं बोध
यंति सा श्रौती ॥ समतुल्यसदृशादि तुल्यार्थवति नियंत्रार्थी साधर्म्यस्य बोधः सत्वार्थी ॥ द्वे
धा वाक्यसमासतद्धिते च त्रिधा ॥ वाक्यगा समासगा तद्धितगा च श्रौतीतथार्थी च
ति षोढा पूर्णोपमा ॥ क्रमेणोदा० ॥ वेधोमृतं यथा स्वादु कुंभाविव कुचोरश्च ॥ गंधचंदनव
न्मोहितवक्तिं व दुर्वर्णपत्त ॥ तत्र क्रमेण श्रौतीत्रयं ॥ कुंभाविवेति समासः ॥ चंदनवदिति

षष्ठ्यन्ताद्द्विवार्थे वतिः॥ अब्जेनास्यं समं कुन्त्वं कुन्दानां स्मितमुज्ज्वलं॥ इवपीयूषवत्तस्या

मोदनोधरपल्लव॥ अत्र क्रमेणार्थीत्रयं॥ पीयूषवदिति तुल्यार्थे वतिः॥ बाल्याप्रकटितटी
कामहरिवपाणिनीसूत्राणां॥ चेतोहृत्तिरिकासौ निरुपमजंघालताचिन्तातिपुरः॥ अत्र
शब्दमात्रसाम्ये श्रौतीयेत्युपमा सूच्यते॥ अथ लुप्ता॥ लुप्ताष्टधोपमेयादेरेकद्वित्र्यग्र
तद्भवेत्॥ उपमेयादीनां चतुर्णां मध्ये एकस्य द्वयोस्त्रयाणां वा चकेऽसु लुप्ते लुप्तोपमा॥ साच
वाचकलुप्ता धर्मलुप्ता धर्मवाचकलुप्ता वाचकोपमेयलुप्ता उपमानलुप्ता वाचकोपमानलुप्ता
धर्मोपमानलुप्ता धर्मोपमेयवाचकलुप्ता चेत्यष्टधा यथा॥ अलश्यामोऽब्जतुल्यास्यो विध्यत्यनु
हृदयं मम॥ दृष्टः कृशानटे कृष्णो नेकानाकल्पपादपः॥ अत्र अलश्याम इति वाचकस्येवशब्दस्य
लोपः॥ अब्जतुल्यास्य इति धर्मलोपः॥ कल्पपादपन्निति धर्मवाचकलोपः॥ विध्यत्यन्निति वा
चकोपमेयलोपः॥ आत्मानं विध्यमिवाचरन्निति आत्मन उपमेयस्य सहोपमावाचकेन लोपात्॥
चूतपादानां समं कापि मनोज्ञं नैव वीक्षते॥ एष चित्तहरः कृष्णो नान्येनैवोपलभ्यते॥ पूर्वार्द्धेत्रिय

मानस्य लोपः परार्द्धे तु वाचकोपमानयोः ॥ नास्ति यत्सदृशं कापि नापि तुल्यं यदास्यया ॥ हरि-
णीनयना राधा तमा धावति केशकं ॥ अत्र पूर्वार्द्धे धर्मोपमानयोर्लोपः ॥ परार्द्धे तु धर्मोपमेय-
वाचकानां ॥ हरिण्या नयने इव मनोज्ञे नयने यस्याः सेति ॥ मालोपमा यदेकस्योपमानं बहु-
वीक्ष्यते यथा ॥ कुमुद्वतीव शीतांशोः केतकीव मनोभुवः ॥ नलिनीव रवेरासीन्मनोज्ञा राधि-
का हरेः ॥ यथोर्द्ध्वमुपमेयस्योपमानत्वप्रकल्पनं ॥ यत्र स्याच्चांरसानिज्ञा वदंति रसनोपमां ॥
यथा ॥ चंद्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कांता ॥ कांतायते स्पर्शसुखेन वारि
वारीयते स्वच्छतया विहायः ॥ १ ॥ एकस्यैवोपमेयत्वोपमानत्वमनन्वयः एकवाक्यगसमिति
शेषः ॥ यथा ॥ सिंधुः सिंधुरिव ज्यायानिंदुरिंदुरिवोज्ज्वलः ॥ २ ॥ पर्यायेण द्वयोस्तच्चेदुपमेयो-
पमा मता ॥ तदुपमेयत्वमुपमानत्वं च यद्द्वयोः क्रमेण स्याद्वाक्यान्यांतदोपमेयोपमा ॥
यथा ॥ श्रीरिव श्रीश वाणीति वाणीव श्रीर्मनोरमा ॥ ३ ॥ प्रतिवस्तूपमे कस्मिन् साधर्म्ये वाक्य-
योस्थिते ॥ यथा ॥ राधया माधवो भाति माधवेनैव राधिका ॥ रजन्या राजते चंद्रश्चंद्रेणेह र-

जऽन्यैरपि ॥ अत्रोपमेयत्वदीप्तिरूपो धर्मः शशाङ्केन्दोपान्तः वैधर्म्येण चेयं दृश्यते ॥ चकोर्य एव च
तुरास्त्वंद्रिकाचामकर्मणि ॥ विनावंतीर्न निपुणाः सुदृशो रतनर्मणि ॥ मालारूपा यथा ॥ विम
ल एव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः ॥ शिवगिरिः शिवहासमहोदरः सहजसुं
दर एव हि सज्जनः ॥ ५ ॥ दृष्टान्तो यत्र सधर्मस्य वस्तुनः प्रतिबिंबनं ॥ सधर्मस्येति पूर्वतो भेदः
यथा ॥ जनः कृशपदध्यायी विषयान्नाभिवाञ्छति ॥ माकंदमुकुलास्वादी निंबकान्नाति को
किलः ॥ वैधर्म्येण यथा ॥ त्वयि दृष्टे कुरंगाक्ष्याः स्रंसते मदनव्यथा ॥ दृष्टानुदयभाजींदौ ग्ला
निः कुमुदसंहतेः ॥ प्रतिवस्तूपमायामेकस्य साधर्म्यस्य द्विरुक्तिः ॥ दृष्टान्तेन सर्वेषां धर्माणां
प्रतिबिंबवद्वभासः ॥ अर्थान्तरन्यासे तु समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावद
स्थायामसाङ्कर्य्येऽपि बोध्यः सोऽर्थान्तरन्यासो यत्र सामान्यविशेषयोः ॥ हेतुहेतुमतोश्चापि तद
न्येन समर्थनं ॥ सामान्यस्य विशेषेण समर्थनं ॥ विशेषस्य च सामान्येन हेतोर्हेतुमता समर्थ
नं हेतुमतश्च हेतुनेति चेति चतुर्विधोऽर्थान्तरन्यासः ॥ समर्थनस्य साधर्म्यवैधर्म्याभ्यां दृष्टत्वा

द्दष्टविधतां व्रजन्ति ॥ क्रमेणोदा० ॥ बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ॥ संभूयांभोधिम
भ्येति महानद्या नगापगा ॥ अत्र विशेषेण सामान्यस्य समर्थनं ॥ चिंतयन्नागतः कृष्णं गांदि
नीनंदनो यथा ॥ तथैव सत्कलत्रेन सफलादिसतां कृतिः ॥ अत्र सामान्येन विशेषस्य ॥ सह
साविद्धीनत न क्रियामविवेकः परमापदां पदं ॥ वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमे
व संपदः ॥ अत्र संपत्करणेन कार्येण सह साविधानाभावस्य विमृश्यकारित्वरूपस्य हेतोः
समर्थनं ॥ पृथ्वि स्थिरा भव भुजंगम धारयैनां त्वं कूर्मराज तदिदं द्वितयं दधीथाः ॥ दिक्कुंजराः
कुरुत तत्रितये दिधीर्षां रामः करोति हरकार्मुकमाततज्यम् ॥ अत्र हरकार्मुकातत्यसज्जीकरणे
न हेतुना पृथ्व्यादिस्थैर्यादेः कार्यस्य समर्थनं एतानि साधर्म्योदाहरणानि ॥ वैधर्म्ये यथा ॥ हरि
विमुखस्य मम मैत प्राणान्नियंतु गांदिनेयस्य तत्पदपंकज मधुपायैस्तु जीवंतु ते ध्रुवं जगति
॥ अत्र सामान्येन विशेषस्य समर्थनं गुणेनोमेव द्रोरात्स्मा धुरि धुर्यो नियुज्यते ॥ असं
जातकिणस्कंधः सुखं स्वपिति गौर्गडिः ॥ अत्र विशेषेण सामान्यस्य एवमन्यदूह्यं ॥ ६ ॥ उप

काव्यको मेयस्योपमानाद्याधिक्यं निबध्यते ॥ व्यतिरेकस्तदाबोध्यो व्यत्ययादृष्य सौ भवेत् ॥ क्वचिदुप
मानादुपमेयस्याधिक्यं क्वचित्तूपमेयादुपमानस्येति तत् ॥ क्रमेणोदा° ॥ पक्ष्मविनः कल्पतरो
२९ रेषविशेषः कस्त्वं तवीर ॥ नमयति कर्णमेकः परस्तु कर्णान्तिरस्कुरुते ॥ एकस्त्वं नव पक्ष्मवि
रहमपिस्नाध्येत्रियायागुणेस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि ॥ कांता
पादतलाहतिस्तव मुदे तद्वन्ममाप्यार्थयोः सर्वं तुल्यमशोकके वहमसहं धात्रा सशोकः कृतः ल
श्लेषविच्छित्तिरूपोयं व्यतिरेकः ॥ उपमा ॥ तत्त्वज्ञैरगाधाः संतिनकाधामनिस्त्रियोस्यद
विशेषस्य ५ रेः ॥ आधारः खलु राधा नियतं मसौ धारणेप्रमत्तः ॥१॥ अप्रस्तुतप्रशंसा तु सा चेत् प्रस्तुतमा
क्षिपेत् ॥ अप्राकरणिकस्य प्रस्तावश्चेत् प्राकरणिकमाक्षिपति ॥ तदाप्रस्तुतप्रशंसालंकारः
तद्भेदानाह ॥ कार्यकारणसामान्यविशेषसदृशबुद्धि ॥ स्यादप्रस्तुते प्रवृद्धत्वादेः सदृशस्य च शं
सनं ॥ तदेवं पंचधा ॥ क्रमेणोदा° ॥ आश्लिष्यकंगतः कांतो न जाने सखि संप्रति ॥ अत्र दुःखि
ताकिमित्युपलक्ष्यते ॥ इति कार्यप्रस्तुतेतद्धेतोः कांतविच्छेदस्य प्रस्तावः ॥१॥ यासौ स्तं प्रहि

कुर्वन्ति वेशानु कृष्णव्रजाङ्गनाः ॥ अत्र कृष्णप्रान्तिकागमने हेतौ प्रस्तुते तत्कार्य्यस्य वेशरचनस्य ॥२॥
गृहनौका कुहनौ हेतु रामनामानि कीर्त्तय ॥ अत्राविद्याविघ्ननाशकतया नक्कि सामान्ये प्र
स्तुते नामकीर्त्तनस्य नक्कि विशेषस्य ॥३॥ प्रसादाद्यावनितानाथकमनीयानि यन्ततः ॥ अत्र
स्वसखीहृदयी विशेषे प्रस्तुते नाधिका सामान्यस्य ॥४॥ कनकाञ्चितमूलोयं तमालः किल दीव्यति
अत्र पीतवासस्सिक्तस्य प्रस्तुते तत्तुल्यस्य स्वर्णनिबद्धमूलस्य तमालस्येति पंचधा ॥५॥ ८ ॥ प्र
स्तुतात्त प्रस्तुतेव्यक्ते कथ्यते प्रस्तुताङ्कुरः ॥ यत्र प्रस्तुतेन वर्ण्यमानेनान्यदभिमतं प्रस्तुतमप्र
तेन प्रस्तुताङ्कुरो नाम तद्वत् ॥ कोशं वदामि यं दधाति नलिनी कादम्बचंचुक्षतं धत्ते चूतलतान
वकिशलयं पुंस्कोकिलास्वादितं ॥ इत्याकर्ण्य मिथः सखीजनवचः सा दीर्घिकायास्तटे चेला
न्तेन तिरोदधे स्तनतटं बिंबाधरं पाणिना ॥ अत्र वाच्यार्थः प्रस्तुतः इयमिति नलिनीव्यक्तिवि
क्तिविशेषनिर्देशात् दीर्घिकायास्तट इत्युक्तेश्च । विशेषः किंचिद्द्वारं नालं कार्यं यद्दुष्करं न
वेत् ॥ आधेयं यदनाधारं यच्चैकं बहुवृत्तिमत् ॥ एकं कार्यं कुर्वतो यदि तेनैव व्यापारेण दुः

काव्यको॰ शकमन्यत्कार्यं सिध्येत् यदि प्रसिद्धमाधारं विनेवाधेयं तिष्ठेत् यदि चैकमेकरूप्येण युग
पदनेकत्र वृत्तिमत्स्यात्तदा त्रिविधो विशेषः ॥ क्रमेणोदा॰ ॥ विधिना विदधे राधा सारमादा
३० यसर्वतः ॥ विधुत्वं न्दारविंदादि तच्छेषेणैव निर्ममे ॥ परलोकगतस्यापि यस्य कुंदेंदुसुंदरं
जगद्व्याप्यं यशो भाति स जीवति न संशयः ॥ अस्ति सा पुरतः पृष्ठे पार्श्वयोश्चि मनस्यपि ॥
कामः केनाध्वना मर्म प्रविश्यन्नतुदत्स्ययम् ॥१०॥ विषमः सम्मतो यस्माद्घटनाननुरूप
योः ॥ इष्टार्थोद्योगतो यत्र स्यादनिष्टस्यैव लंभनं ॥ कार्यस्य च विरूपं स्याद्वैरूप्याद्गुणकर्म
णोः ॥ क्रमेणोदा॰ ॥ क्व वज्रसारश्चाणूरः क्व कृष्णः कुसुमस्रजः ॥ अत्रोतिकर्कशत्वेनातिमृ
दुत्वेन च विरूपयोश्चाणूरकृष्णयोर्घटना ॥ अयं दुग्धसिंधोः पतितोऽकुल्लेशो हरिर्मूरि दु
ग्धप्रदाता तेनिलोनात्तु नजंतो न्वहं तेन तुष्याविता साः स्वकान्मात्तदुग्धाद्धयेवारिताः स्मः ॥ त
मालश्यामलोप्येष नवासिरसुरेतक ॥ श्यामज्यपरसेनायां तनोति विशदं यशः ॥ अत्र श्या
मरूपं कारणगुणस्तद्वैरूप्यं शौक्ल्यं कार्यजातः ॥ सखि मनोजस्तनेत्रेणानंददायिना ॥

तापं तनोति रुक्षस्य तच्चित्रमिदं महत् ॥ अत्र कारणनिष्ठा क्रियानंदः तयाऽऽहृता तापक्रि
या कार्य्ये ॥११॥ तद्गुणः स्वगुणं हित्वा यत्रान्यगुणमाश्रयेत् ॥ यथा ॥ अधरं जनयोः कां
त्या सुतनो रुपरंजिताः ॥ पद्मरागत्वमायांति मुक्ता नासावलंबिताः ॥१२॥ संगतान्यगु
णानंगीकारस्तु स्यादतद्गुणः यथा ॥ क्षीराब्धेरुदराज्जातः कालकूटस्य सोदरः ॥ तथापि
रक्तः एवैकः कौस्तुभो न सितासितः ॥१३॥ पूर्वख्यातगुणोत्कर्षोऽनुगुणः कारणांतरैः ॥ यथा
मर्कटो मदिरामत्तो वृश्चिकेनापि दंशितः ॥ ग्रस्तश्च ग्रहपिशाचेन कुरुते गुरुचापलं ॥ अत्र स्वा
भाविकस्य कपिचापलस्य मद्यादिभिरुत्कर्षः ॥१४ प्रत्यनीकं बलिष्ठस्य रिपोः पक्षे पराक्रमः
यथा ॥ मध्येन तनुमध्या मे मध्यं जितवती स्वयं ॥ इभकुंभौ भिनत्त्यस्याः कुचकुंभनिभौ हरिः
॥१५॥ उत्कर्षवस्तु यत्तस्योपमानत्वं प्रकल्प्यते ॥ प्रख्यातस्योपमेयत्वमुपमानस्य यद्भवेत्
निष्फलत्वं वचो यच्च तत्प्रतीपं त्रिधा स्मृतं ॥ क्रमेणोदा० ॥ अहमेव गुरुः सुदारुणानामिति
हालाहल तात मास्म दृप्यः ॥ ननु संति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानां

अत्र परमदारुणत्वेन हालाहलमुत्कर्षं दुर्जनवचनस्योपमानं तत्कल्पितं ॥ विधुरः श्रेया
नूयत्नेनाप्युपमीयते ॥ कृशोदरि तवाननेन मुखेन मृगलांछनः ॥ विभाययेवेधा वदनं मृगा
क्ष्या निरीक्ष्य चंद्रं क्षयिणं जडं च ॥ असंस्तुतमस्या वदने सविज्ञः कलंकमस्यांकलयांचकार
एतस्मिन् वदने सति निष्फलोयं विधुरिति तत्रांकमसीक्षेपः ॥ छ ॥ नवेत्संभावनोत्प्रेक्षा
त्रेधा वस्त्वादि भावतः ॥ वस्तुनो वस्त्वन्तरभावेनाहेतोर्हेतुभावेनाफलस्य फलभावेन सं
भावना त्रिविधोत्प्रेक्षा उत्कटतया प्रकृष्टस्योपमानस्य सा प्रतीतिर्या यागादुत्कटोपमानको
टिकः संशयः सेत्यर्थः ॥ क्रमेणोदा॰ ॥ जंभानुबंधविकसद्वदनोदराणां चंद्रः करेण कृपये
व कुमुद्वतीनां ॥ निर्वर्ण्य गाढविरहानलमुज्ज्वलं तन्मंगारपुंजमिव कर्षति न गुसुं खं ॥
॥ अत्र भृंगसंघस्वरूपस्य निर्वापितांगारपुंजस्वरूपत्वेन संभावना स्वरूपोत्प्रेक्षा ॥ उप
मानस्योद्धतपुंजस्योत्कटा प्रतीतिरस्ति ॥ सा राधिका मदधिके तिरुपाति तामस्ः खंडो विजे
तुं मुदयं जगाम ॥ वीस्याथ तस्य दलसन्नखरांशुजालं पांडुर्विदग्धहृदयः सवनं वसंघः

अत्र पूर्वाद्र्यारोहणादिक्रमेण व्योम्नि विचरतो विधोरक्किमपाण्डिमच्छौं लाञ्छनव्यक्तेः स्वाभा-
विकी ॥ सा चात्र श्रीराधिकाविजिगीषा तदं धिनखरांकुरं दर्शनिकता तन्मतिरस्कारहेतुक-
त्वेन संभाव्यते ॥ न च तस्यास्तद्विजिगीषादिहेतुरिलसहेतोरहेतुत्वेन संभावनाद्धेतूत्प्रेक्षा ॥
वीस्यावलग्नं सरसीरुहास्या विभज्यमानं स्तनयोर्भरेण ॥ तयोर्विधत्ते विधिरद्भुतानि वं-
धनतन्तुं किं त्रिवलीलताभिः ॥ अत्र मध्यः स्वयमेव स्तनौ धरतीति तन्तुलताबंधनभावेना-
ध्यवसितायास्त्रिवलीशालितायाः सामर्थ्यादितिमध्यकर्तृकायाः स्तनविधृतेस्तत्फल-
त्वेन संभावना फलोत्प्रेक्षा ॥ १७ ॥ द्योत्यार्थद्योतनं मुद्रा शब्दैः प्रकृतवाचिभिः ॥ यथा ॥ पुष्प-
मार्गणेन मनोरथा हतेत्यादि ॥ अत्र नायिकावर्णनपरेण रथोद्धताशब्देन रथोद्धताख्य-
स्य सृत्वस्यच्छंदसः संसूचनं मुद्रा ॥ एवमन्यत्र च बोध्यं ॥ विचित्रं तद्वितैरुद्धं चेत्कुर्यादिष्ट-
फलाप्तये ॥ यथा ॥ नमस्युन्नतये प्राणान्मुंचत्याजीवनाप्तये ॥ दुःखीयति च सौख्याय
को मूढः सेवकात्परः ॥ १८ ॥ समाधिः सुकरं कार्यं यदृच्छालंतरागमात् ॥ यथा ॥ प्रणम्य

हृत्सस्य२ निंबफले३ आम्रे३

काव्यको. पादो हस्मन्नानुजायाः प्रासादनं कुर्वन्ति पंकजासे ॥ तथा वृद्धः प्रांशुजगर्जविस्मितंदीयथासो
३२ सहसास्य नेजे ॥२०॥ समं स्यादानि रूपेण श्लाघा चेद्योग्यवस्तुनः ॥ यथा ॥ विसर्गस्य
चित्तो पि विधिर्युक्तविधानकः ॥ पिचुमर्दफले काकः सहकारे कृतः पिकः ॥२१॥ सार
स्यात्प्रांतविश्रांतोत्पद्युत्कर्षो यथोत्तरं ॥ यथा ॥ राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधं
सौधे तल्पं तल्पे वरांगनानंगसर्वस्वं ॥२२॥ श्लेषस्त्वकार्थकैः शब्दैर्यद्धनेकार्थवाचनं यथा
प्रवर्त्तयन्क्रियाः साध्वी मालिन्यं हरितां हरन् ॥ महसा महसा दीप्तो विराजति दिवाकरः
अत्र रविर्नृपविशेषश्च वाच्यावभिधाया अनियमात् ॥ तत्रैको नियमात्परस्तु तत्तुल्यया
हृदि लक्षणया बोध्यः ॥२३॥ नष्टेपि हेतौ तत्कार्यं यदि दृष्टं तदा भवेत् ॥ पुनः स्वगुणल
ब्धिर्वा पूर्वरूपं तदा द्विधा ॥ क्रमेणोदा० ॥ ज्योत्स्नापि चिरहतो रात्र्यां स्वनोरत्नमगाद्विधुः ॥
अन्यः ज्योत्स्नी तथैवासो तयोर्वदनकांतिभिः ॥ तवकरकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुध्या ॥ अनुकलमनुकर्षन्येन कीरो निषिद्धः स भव

तु मममनूत्स्येवाणिते मंदहासः ॥२४॥ उत्तरं तूत्तरं श्रुत्वा प्रश्नश्चेत्परिकल्प्यते ॥ बहूनि वावि
चित्राणि प्रश्नप्रतिवचांसि तत् ॥ क्रमेणोदा० ॥ मदुरसिसो रजनलो मातू पतितानु मम्मनानि
नाविते मधुपान् ॥ विदितं निवारयंसानुमयानखर रस नं तदाम्युदिते ॥ अत्रत्व हससि
कस्मादमूनि सततानीति प्रश्नो गम्यते ॥ किं गेयं भगवन्नाम किं ध्येयं तत्कथामृतं ॥ किं हेयं मु
रुवे मुखं किं ध्येयं तत्पदांबुजं ॥ नचेयं सप्रश्नपरिसंख्याश्चान्यव्यपोहे तात्पर्य्याभावात् ॥२५॥
पृष्टं किंचिदपृष्टं वा यद्युक्तं परिकल्प्यते ॥ तत्सामान्यनिरासाय परिसंख्या तदा भवेत् ॥ किं
चिद्वस्तु पृष्टमपृष्टं वा गुणादिना सधादि तत्तुल्यान्यव्यावृत्तये कल्प्यते तदा परिसंख्या तत्रोभ
यत्र व्यावर्त्यं गम्यं वाच्यं चेति चतुर्धासौ ॥ तत्र पृष्टं यथा ॥ कः खलु चिंतनविषयो रघुपति
रिह के पुनः पूज्याः तत्सेवकाः न चान्ये तत्पदपंकजवदितरे ताः ॥ अपृष्टं यथा ॥ ध्येयो बुद्धि
मता कृष्णो भगवान् जगदीश्वरः ॥ सेव्या वेदविदो विप्रा नैतन्नेहतुवादिनः ॥२६॥ क्रमः स्या
त् क्रमिकाणां चेयदानां क्रमतोऽन्वयः ॥ यथा ॥ मृगमीनसज्जनानां तृण जलसंतोषविहितवृ

णीनां ॥ लुब्धकधीवरपिशुनानिःकारणवैरिणो जगति ॥ इदं यथासंख्यमाहुः ॥ २७ ॥ क्र
मादेकमनेकस्मिन्पर्यायोऽसस्याच्च सः ॥ एकं वस्तु चेत् क्रमेणानेकत्र स्यादनेकं वैकत्र
तदा पर्यायो द्विधा ॥ क्रमेणोदा० ॥ चेतो मदीयं चिकुरे नियस्य त्वादिविल्लसंतितिनितंबिन्यो
यत्र चित्रांबरांचिताः ॥ विचरंति शिवास्तत्र लंबदेहि नवने विनो ॥ २८ ॥ उपमाद्रूपकं प्रा
हुर्भेदे सति तिरोहिते ॥ सांगं तत्स्यान्निरंगं च परंपरितमेव च ॥ सांगं यथा ॥ माधुर्यम
धुभिः पूर्णं दशनद्युतिकेसरं ॥ हरिनेत्रालिनीपीतं राधावदनपंकजं ॥ निरंगं यथा ॥ मुखं
दुग्धवणोविंदु प्रकाशयति मे मनः ॥ यस्य कस्यचिदारोपः परस्यारोपको यथोदा ॥ तत्परं
परितं श्लिष्टाश्लिष्टशब्दविनिर्मितं ॥ क्रमेणोदा० ॥ कमलामोदरोलंबो मदलंकस्सत्यांशुमा
न्योगिमानसहंसोऽयं नवतांडवतापजित् ॥ अत्र कमलायामामोद एव कमलानामामोद ए
वमाद्यारोपो भगवतो रोलंबत्वाद्यारोपकः ॥ हरिद्विपगजपंचास्यो दुर्नेयांबुधिमंदरः ॥ दान
वारण्यदवाग्निर्दुःखदामोदरोऽवतु ॥ अत्र हरिद्विपादेर्गजत्वाद्यारोपो भगवतः पंचास्यत्वा

द्यारोपकः ॥२९॥ परिणामः क्रियार्थश्चेदारोप्योविषयात्मना ॥ आरोप्यश्चेदारोपविषयात्म
नाक्रियार्थः प्रकृतक्रियोपयोगी स्यात्तदा परिणामः ॥ यथा ॥ कुह्नेन सास्मितकमलेन ददर्श
कांतं ॥ अत्र कमलमस्मितेन परिणतं सत् प्रकृतां दर्शनक्रियां निर्वर्त्तयति ॥३०॥ प्रकृतं
यन्निषिध्यान्यत् स्थाप्यते सापह्नुतिः ॥ उपमेयं प्रतिषिध्य यदुपमानस्थापनं सापह्नु
तिः ॥ उदा- ॥ अंकं केपि शशंकिरे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छा
यमेके नु परे ॥ इन्दौ यद्दलितेंद्रनीलशकलश्यामं दरीदृश्यते तत्सांद्रं निशि पीतमंधतमसं कु
क्षिस्थमालक्ष्यते ॥ अत्रेंदोः कलंकादिकं प्रकृतं निषिध्याप्रकृतं तमः स्थापितं ॥३१॥ व्या
जस्तुतिस्तु निंदायाः स्तुतेर्वाभिंत्सयाज्ञ वेत् ॥ निंदास्तुतिभ्यां वाच्याभ्यां स्तुतिनिंदे चेत् क्रमाद्गम्ये
स्यातां तदा व्याजस्तुतिः ॥ क्रमेणोदा- ॥ नजते स्तवपादद्वयं कजं न चकितं फलमश्रवीष्यते ॥ अ
पि तु स्वजनाद्विविच्युतिर्विदितं ते चरितं मयाद्भुतं ॥ अत्र निंदया स्तुतिर्व्यज्यते ॥ जगति त्वं स
मो नान्यः स्पृहाभूतः समीसाले ॥ हरिकीर्त्तिं निरत्नानि कंठेयत्कुरुषे न हि ॥३२॥ अन्योन्य

क काव्यको· क्रियया चेत्तयोस्तदुपरागः परस्परं एकजातीयया क्रियया मिथश्चेदुपकारस्तदान्योन्यं ॥ उदा-
राधया माधवो भातीत्यादि ॥ अत्र दीप्तिजननक्रियया मिथो द्वयोरुपरागः ॥ ३३ ॥ आधारा
३५ धेययोरेकस्याधिक्ये धिकमिष्यते ॥ आधाराधिक्ये यथा ॥ वर्सांसि ग्रजराजे स्मनीला
३५ न्त्रमिवयद्वपुः ॥ कलींद्रएणाघ्नगएया येकथं मांत्यत्र ते गुणाः ॥ आधेयाधिक्ये यथा ॥ यु
ष्मांतः सकलं विश्वममन्स्य म्नोकुलेश्वरी ॥ विप्रवीसो प्नतामोदास्तास्मिन् वपुषिनाममुः ॥
॥ ३४ ॥ विनोक्तिस्तु विनैकं चेत्तु सन्नसन्वानिबध्यते ॥ एकेन विनायद्येकः शोभनोऽशोभ
नो वा स्यात्तदा विनोक्तिः ॥ क्रमेणोदा· ॥ विनाकं चुलिकां धत्ते चनिता यतचारुतां ॥ रामारू
पा निरामापि नभाति विनयान् विना ॥ ३५ ॥ व्याजोक्तिस्तु यद्दिव्यक्तं छद्म नाचि निगूह्यते
यथा ॥ मदुरसीत्यादि ॥ अत्र कांतकृतानि नखक्षतानि मंगजनस्तस्तनक्षतव्याजेन गो
पितानि ॥ यथा वा ॥ कुटनोऽग्वल्लवनमाल्लं कामयते कानमाधवं प्रमदा ॥ हृदये स्पृहय
सि राधे नहि नहि वैरिणि वसंतायः ॥ यथा वा ॥ सजन्मनमलदे लग्नः कांतः किंनाद्दिन्

नूपुरः समासोक्तिर्यदि श्लिष्टैः परोक्तिः स्याद्विशेषणैः ॥ कलानिधिरस्याद्दोसोयं कलो विजयते
तरां मिति तुर्य्यविशेषणादेः समसुदाहरणं ॥ अत्र श्लिष्टविशेषणमाहात्म्याच्चंद्रस्यापि प्रतीतिः ॥ ३७ ॥
सहोक्तिः पदमेकं चेत् सहार्थं धा च विकं द्वयोः ॥ उद्दामिनेन सह कान्तस्य तस्याविकसि
तं मनः ॥ यथा वा ॥ सहाधरे तल्लेनास्याया यो वने रागवानुप्रियः ॥ ३८ ॥ अप्रस्तुतसोऽयादि
ख्यातिरस्तुक्तिरुच्यते ॥ यथा ॥ राजन् संप्राप्य कूपारस्त्वत्सेना पाणिशोषिताः ॥ नदेरिराज
वनिता बाष्पपूरेण पूरिताः ॥ यथा वा ॥ यच्छंतमर्थान् विबुधान् जनेन्यः श्लोवीरी यं नयसार्व
भौममर्थ ॥ कल्पद्रुमायाच्चकभावनाजस्लस्यप्रतीहारतंदीनगंते ॥ ३९ ॥ डिंमादिनिजचेष्टो
क्तिः स्वभावोक्तिरुदीर्यते ॥ यथा ॥ मुखपुटनिहितकरांगुलिरुच्चलचरणः सदेवकीसू
नुः क्षणरुदितस्मितकुशलो व्रजकुलममुदमतिनरामनतोद ॥ ४० ॥ निरुक्तिश्चेद्भवेन्नाम्नां
योगादन्यार्थकल्पना ॥ यथा ॥ स्वज्ञातिशत्रोः शक्रस्य संछेदनूपरिमुल्वणं ॥ दधाराक्षय
मन्वर्थमेव गोवर्द्धनो गिरिः ॥ ४१ ॥ प्रकृतस्योपमानेन यो निगीर्णस्य निश्चयः ॥ अन्यदेवेति य

द्वस्तुनदेव परिकीर्त्यते ।। यच्चु चेद्यदिशब्दाभ्यामसंभाव्यार्थकल्पनं ।। यो वैचित्र्यात्स
यो यश्च व्यत्ययेन हेतुकार्ययोः ।। प्रयोगेप्ययोगः ।। योगेपि योगः परिकल्प्यते ।। षड्विधाति
शयोक्तिः साकविभिः समुदीर्यते ।। अंतर्निगीर्णस्योपमेयस्य यदुपमानेन निरूपणं
सातिशयोक्तिः ।। प्रथमा यथा ।। जाता लता हि शैले जातु लतायां न जायते शैलः ।। संप्रति
तद्विपरीतं कनकलतायां गिरिद्वयं जातं ।। अत्र लतया नायिका निगीर्यते ।। गिरिभ्यां तु स्त
नद्वयुग्मं ।। यच्च तदेव वस्त्विदमन्यदेवेति वर्ण्यते साद्वितीया ।। यथा ।। अन्यदेवांगलाव
ण्यमन्याः सौरभसंपदः ।। अस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकं ।। यदि चेच्छब्दाभ्यामसं
भाव्यार्थस्य यत्कल्पनं सा तृतीया ।। यथा ।। प्रवालं मुक्ताद्युतिपुष्पजालश्चलन्न यदि
स्यात्कनकाक्रमूलः ।। तदापि तच्छायवीथिशिरोरविपिच्छमोल्लेखेहास्यहास्यायदधीनचेतः ।।
हेतोः शीघ्रकारितां वक्तुं कार्यस्य पूर्वभाववचनं यौगपद्यं वा साचतुर्थी ।। क्रमेण यथा ।। जातः
संस्तति सर्पस्य पूर्वं दर्पं परिक्षयः ।। श्रीरंगि संगिनो संगः संप्रति प्रतिपद्यते ।। न जंति युग

यद्वीरज्यां रिपूंश्च तवेषवः ॥ संबंधेपि सति यदसंबंधकल्पनं पंचमी ॥ यथा ॥ अनयोरनवद्यांगि
स्तनयोर्जृंभमाणयोः ॥ अवकाशो न पर्याप्तस्तव बाहुलतांतरे ॥ अत्र बाहुमध्ये स्तनावकाशयो
गेपि तदयोगो वर्णितः ॥ असंबंधे संबंधकल्पनं सा षष्ठी ॥ दिनैः कतिपयैरेव यातु ॥ यथा ॥
स्पर्धे मेरुर्दिनां लकूतः ॥ इदमत्यंतमुदं कोकीदातरि त्वयि भूपते ॥ अत्र चक्रवाक्यादिव सावनकारि
सुमेरुविनाशसंभावनप्रयुक्तानंदासंबंधेपि तत्संबंधो वर्णितः ॥ ६२ ॥ हेतो सति फलस्योक्ति
विशेषोक्तिरुदीर्यते ॥ यथा ॥ अनुरागवती संध्या दिवसस्तत्पुरःसरः ॥ अहो दैवगतिश्चित्रा
तथापि न समागमः ॥ यथा वा ॥ शय्यानाहस्ताक्षे मृदुलमुपधायाधरदलं हरे मे दृग्दोलालक
तलमिराचीज्जितननु ॥ दधाना माशंकांगुलिभिरसि संवाहनविधिं तथाप्येषा वंशीनदति मजति
मिग्रालवमपि ॥ ६३ ॥ युक्तिः कथंचिद्यत्किंचिल्लक्रिययापि निगूह्यते ॥ यथा ॥ दंपत्योर्निशि ज
ल्पतोर्गृहशुकेनाकर्णितं यद्वचस्तत्प्रातर्गुरुसंनिधौ निगदतस्तस्यातिमात्रं वधूः ॥ कर्णालं
वितपद्मरागसकलं विन्यस्य चंचूपुटे व्रीडार्त्ता विदधाति दाडिमफलव्याजेन वाग्बंधनं ॥ स्या

जोक्तिर्वाचा गुप्तिरिह तु श्लेषेणेति भेदः ॥ ४४ ॥ लोकवादानुकारस्तु लोकोक्तिर्नएपते बुधैः ॥
यथा ॥ नाम्नैव ते वरद वांछितदानात् नावं व्याख्यातो नव हंस वरदानमुद्रां ॥ विश्वप्रसिद्धनरवि
प्रकुलप्रसूतयज्ञोपवीतवदनं हि न खल्वपेक्षम् ॥ अत्रोत्तरार्द्धे लोकप्रवादानुकरणं ॥ लोको
क्तिरेव छेकोक्तिर्भवेदर्थान्तरान्विता ॥ लोकोक्तिरर्थान्तरगर्भा छेकोक्तिः ॥ यथा ॥ अहिरेव हि
जानीयादहिपादान्न चापरः ॥ कस्मिन्वने कृष्णोऽद्य क्रीडतीति पृच्छती त्वं कस्मिन् सख्यो कंचित्स
स्वास्यं ॥ पृच्छति सति कृष्णान्तिकस्थं सुबलमुद्दिश्य सनमादह अहिरेव हीति ॥ लोकप्रवादानुकारा
यं ॥ स चास्य स्मारं स्मारं मध्यममेव चेत्तीर्थान्तरंगनीकरोति ॥ ४७ अहेतौ हेतुताक्लृप्तिः प्रौढोक्ति
रिति कीर्त्यते ॥ कार्यातिशयाहेतौ तद्धेतुत्वकल्पनं प्रौढोक्तिः ॥ यथा ॥ कल्पतरुकामदोग्ध्रीचिं
तामणिधनदशंखानां ॥ रचितो रजोभिरभयस्तेजःश्वासैरन्तरांचरैरेष ॥ अत्र राज्ञोऽतिदातृत्वं
वर्ण्यते ॥ तत्र च कल्पतर्वादिषु च निर्मितत्वं हेतुर्न तु वस्तुतस्तद्धेतुत्वम् ॥ ४८ ॥ मिथ्याध्यवसितिर्मिथ्या
सिद्ध्यै मिथ्यार्थनिर्मितिः ॥ यथा ॥ गोविंदं चरणेन हंत मायावादविशारदः ॥ लभते मच्छिद्रानंतरं ख

पुष्पस्तवकं वहन्तु ॥ न चेयं तृतीयातिशयोक्तिः ॥ चेद्यदिशब्दाभ्यामसंभविनोर्थस्य कल्पनात् ॥ ४५ ॥
फलोत्पत्तिर्विना हेतुं यत्र स्यात् सा विभावना ॥ यथा ॥ अपीतक्षीवकादम्बमसंमृष्टामलाम्बरं ॥ अ-
प्रक्षालितसूक्ष्माम्बुजगदासीन्मनोहरं ॥ अत्र हेतोरकात्स्न्ये प्रतिबन्धत्वे कार्यविरूपत्वे हेतुत्वेना-
ख्यातस्यां च केचिद्विभावनां मन्यते ॥ क्रमेणोदा० उद्यानमारुतोद्धूतचूतचंपकरेणवः ॥ उद्दस्रयंति
पान्थानामस्पृशंतोपि लोचने ॥ अत्र स्पर्शक्रियावैकल्यमेव हेतोरकात्स्न्यं ॥ चित्रं तपति राजेन्द्र
प्रतापतपनस्तव ॥ अनातपत्रमुत्सृज्य सातपत्रं द्विषज्जनं ॥ अत्र तापहेतोः प्रतापतपनस्यात-
पत्रं प्रतिबंधि ॥ उदिते कुमारसूर्य्ये कुवलयमुल्लसति मालिनं तत्र ॥ मुकुलीभवंति चित्रं परारा-
तकुमारपाणिपद्मानि ॥ अत्र कुवलयोल्लासादेः कार्य्यस्य सूर्य्योदयो नानुरूपो हेतुः ॥ उभयत्र
विरोधाभासेन संकीर्णेयं ॥ अम्बुजमम्बुनि जातं क्वचिदपि नो जायतेऽम्बुजादम्बु ॥ मुरभिदि तद्विपरी-
तं पादांभोजान्महानदी जाता ॥ अत्र नद्याः कारणत्वेन ख्यातं नांभोजं ॥ ५० ॥ उपायेन विना सि-
द्धिर्वाञ्छितार्थस्य यद्भवेत् ॥ उपायापायदुपायार्थाद्धुवेयस्यापत्तं मनं यद्वे शान्त्यधिकार्यस्य सि-

धिस्तत्स्यात्प्रहर्षणं ॥ क्रमेणोदा० ॥ मुनेर्दुर्वाससः कोपात्त्रातुमस्मान्नलं हरिः ॥ इति चिंतन्न
यो राज्ञस्तत्रासीत्स्वयमेव सः ॥ फलोपायस्य साधकोपायत्नाद्वंतरालि कोपाये सिद्धिमनपेक्ष्य
३७ फलस्य लाभे तु साक्षात्प्राप्तिः स्यात्तद्विप्रहर्षणं ॥ यथा ॥ अंजनाय खनन्मूलमद्राक्षं निधिदृ
37 शनि ॥ अधस्ताद्दलनं तस्य सर्वदुःखहरं निधिम् ॥ अत्रांजननिरपेक्षो निधिलाभः ॥ यथा वा ॥
धुवायै स्मृतये विष्णोर्यशो वेश्मनि कीर्त्तयन् ॥ वकुलाम्बान्नृपस्तस्मिंस्तमपश्यत्समागतं ॥ अ
त्र स्मृतिनिरपेक्षः साक्षात्कारः ॥ स्थानानि कामस्तपसि स्थितोहं त्वां दृष्टवान्साधुमुनीन्द्रगुप्तं ॥
का चं विचिन्वन्निव दिव्यरत्नं स्वामिन्कृतार्थोस्मि वरं न याचे ॥ व १ ॥ यत्साक्षात्करणं नूतनावि
र्नोमाविके तु यत ॥ यथा ॥ आसीत्कंचुलिकात्रेति परस्पाम्यस्याः कुचद्वयं ॥ कलयामि निलंबंच
रणे ष्यन्मालिमेखलं ॥ अत्र पूर्वार्द्धे न तस्य साक्षात्कारः परार्द्धे तु नादिव ॥ परा ॥ उद्दान्तमतिसंप
त्तिवर्णनं कविभिः स्मृतं ॥ यथा ॥ जनितविंवितनिंकुरंवैः करंवितमुकुरमुकुरमंदिरे कृष्णं ॥ च
तुरोपि चतुर्मुखमुनिरतिकृष्टात्प्रवोधिष्टां ॥५३॥ परिविभिः स्मृतार्थानां यस्याद्विनिमयो मिथः ॥
यथा कृष्णादंकस्रजंनी त्वामोति मानाम्पधात्प्रिया गृहीत्वा सतु साची ज्ञामदाद्वक्षोजपीडनं ॥ ५४ ॥ विधामासो निषेधेपि विधिश्च क्रमीक्ष्यते ॥

॥यथा॥ गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः॥ ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥
अत्र त्वयि गते हं न जीविष्यामि तत्त्वया न गन्तव्यमिति निषेधो गच्छेति विधिर्दर्शितः॥५५॥ अवि
रोधे विरोधित्वं विरोधाभासमुज्जगुः॥ जात्यादीनां तु जात्याद्यैः स स्याद्दशविधो मतः॥ यथा॥
दावस्त्वद्धिमवातः पंकजमुद्बान्धवस्त्वर्षि चंद्रमुखि मर्मकृतः खलु मधुपाश्चैत्यं च हन्ताहन्त्यं कि
मिदं॥ अत्र बालपंकजमधुपचैत्यशब्दा जातिवाचकाः॥ दावेत्यक्रूत हन्ताहन्त्यशब्दास्तु क्रमा
ज्जातिगुणक्रियाद्रव्यवाचकाः तेषामेतेषां च क्रमाद्विरोधवदवभासः॥ यथा वा॥ ध्वनिः
पिकानां मधुरोऽप्युग्रः कटुः शीतोऽपि दाहकृत् तनुते स्म मारुतः॥ सुकोमलोऽप्यच्युतपुष्पकं दु
कान्तवह्नियोगेऽपि विरेचसुत्कृत्व॥ अत्र मधुरशीतकोमलशब्दा गुणवाचकाः कटुदाहकृति
शब्दाः क्रमाद्गुणक्रियाद्रव्यवाचकाः॥ एवमन्येऽपि भेदा बोध्याः॥ पराभवं केनित्यं वक्रेतां
वर्वं धं च नीतिं च मतिं च कृत्वा॥ पवर्गदाता पि शिखंडमाले त्वं शान वाणेन पवर्गदोऽसि
जह्राऽहृदयं रामा हारिण्यपि विहारिणी सेवमादिघुश्लेषविच्छित्तिकः सः॥५६॥ पर्या

याऽर्के पदान्तरगतां वाच्यवद्दिष्यते ।। यथा ।। गवेसि सखि किं वासं विजहौ रतिचेतसि ।। हृदि
दासरथ्ये धैर्य्यं विलोक्य जनकात्मजा ।। अत्र रतिनिर्निगर्वविरामोऽनि धैर्य्ये इति व्यंग्यो व्यर्थो
नंगीविशेषापनिवंधाद्वाच्यवत् प्रकाशते ।। ५१ ।। एकस्य बहुधोऽनेकैराकुलैरेव स्यादलं
कृतिः ।। यथा ।। प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।। नारायण इति भ
क्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ।। पदा० ।। प्रकृताप्रकृतानां यद्धर्मैक्यं दीपकं तु तत् ।। एकैव क्रि
यासु बह्वीषु कारकं यदि तन्मतं ।। तद्दीपकं ।। क्रमेणोदा० ।। नदीनां च वधूनां च भुजगानां
च सर्वदा ।। मन्मनामपि गतिर्वक्रा कारणं तत्र नेष्यते ।। अत्र प्रकृतानां नदीनां प्रकृता
नां प्रेम्णां च वक्रगतिरेको धर्मः ।। द्विः शरान्नाभिसंधत्ते द्विः स्थापयति नाश्रितान् ।। द्विर्द
दाति न चार्थिभ्यो रामो द्विर्नाभिभाषते ।। अत्रैकं कर्तृकारकमभिसंधानादिषु क्रियासु सं
बंधि द्वंद्वं पश्चान्नयायोगः ।। यथा वा ।। मा हृते चिंतये त्वं तु वैपथे वीक्ष्य सादरं ।। ५२ ।।
मालादीपकमाद्यं चेद्यथोर्द्धमुपकारकं ।। यथा ।। त्वयि संगरसंप्राप्ते धनुषासादिताः

शराः॥ शरैररिशिरस्तेन नूत्नया त्वं त्वया यशः॥ यथा वा॥ आग्नेयैर्नूत्नया मवानप्रामोत्
वतामहितामतिः॥ मत्वा मुमुक्षुशरणं चरणं मुरवैरिणः॥ अत्र नूत्न्यादिभिः पूर्वपूर्वैरुत्त
रोत्तरेषु नवत्वादिषु प्राप्तिक्रियाकर्मत्वविधानरूपोपकृतिः॥ ६०॥ वस्तूनामितरेषां वा
धर्मैक्यं तुल्ययोगिता॥ प्राकरणिकानामेकधर्माभिसंबंधस्तुल्ययोगिता॥ अप्राकरणिका
नां वा सतथा॥ क्रमेणोदा०॥ आयुःश्रियं यशो धर्मं लोकानाशिष एव च॥ हंति श्रेयांसि सर्वा
णि पुंसो महदतिक्रमः॥ अत्र महदतिक्रमनाम्न्यैकेन प्रकृतानां पुरुषायुःप्रभृतीनां हंति
रूपैकक्रियया संबंधः॥ त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते॥ मालती शशभृल्लेखा क
दलीनां कठोरता॥ अत्र नायिकासौकुमार्यवर्णनाप्रकृतेऽप्रकृतानां मालत्यादीनां कठोर
त्वरूपैकगुणसंबंधः॥ ६१॥ मीलितं तन्निसादृश्याद्भेदश्चेन्नैव लक्ष्यते॥ उदा०॥ श्यामत्वे कु
जकस्तूरी जनैर्नालक्षि वक्षसि॥ अलिके लक्ष्मकं चापि गौरिकान्ते मधुद्विषः॥ ६२॥ कुतश्चि
द्भेदज्ञाने तु प्राक्तमुन्मीलितं बुधैः॥ उदा०॥ राधे तडित्स्फुरितवेषगंडयोः कर्णावतंसवीन

वकेतकीछदः ॥ नसारङ्गेणापि मनोविभिन्नता मधुव्रतेनैष विविच्य बोधितः ॥ ६३ ॥ सामा
न्यमतिसादृश्याद्विशेषश्चेन्नलक्ष्यते ॥ उदा० ॥ मल्लिकामल्लधारिण्यः सर्वाङ्गीणार्द्रचं
दनाः ॥ क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥ ६४ ॥ विशेषस्य कुतश्चिच्चेज्ज्ञानं
स्याद्विशेषकः ॥ उदा० ॥ आसन्नपद्माकरे स्त्रीणां पद्मान्यास्यानि संप्रति ॥ लक्षितान्युदि
तेचंद्रे पद्मान्यास्यानि च स्फुटं ॥ ६५ ॥ मीलितोदाहरणे श्यामतातिसाम्याद्वक्षसः श्यामकक
स्तुरीनलक्ष्यते ॥ सामान्योदाहरणे वस्तुपार्थक्यावभासे शौक्ल्यातिसाम्यात् व्यावर्त्तक
विशेषो नोपलभ्यते ॥ उन्मीलितविशेषकौ तु तयोः प्रतिद्वंद्विनावन्वर्थौ यस्मिन् विशेष
सामान्यविशेषाः ॥ स विकस्वरः प्रस्तुतविशेषसमर्थनाय सामान्यमुपन्यस्यापरितो
षात् पुनर्विशेषस्त्वदुपन्यस्यते तदा विकस्वरः ॥ उदा० ॥ अनन्तरत्नप्रभवस्य तस्य हिमं न
सौभाग्यविलोपिजातं ॥ एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवांकः ॥ तस्य
हिमाचलस्येति प्रकरणात् ॥ ६६ ॥ एकस्य गुणदोषाभ्यां यदि स्यातां परस्य तौ ॥ क्रमतो

व्युत्क्रमात्स्वेपितदोऽन्त्रासश्चानुविधिः ॥ लोगुणदोषो कुसुमावचयार्द्रं सस्तनायतनपरिपीडि
तः ॥ एकः कृतीमुंदृगंभशोषमगंनुबोधरः ॥ अत्र नासिकासोदर्ष्यगुणेन तन्निपीडितस्य स्वां
सस्यकृतित्वगुणो निरूपितः ॥ दोषेण दोषापदेशो यथा ॥ लोकानंदनचंदनद्रुमसखेनास्मि
न्वने स्थीयतां दुर्वंशैः कठिनैरसारहृदयैराक्रांतमेतद्वनं ॥ ते ह्यन्योन्यनिघर्षजातदहन
ज्वालावली संकुलानस्वान्येन कुलानि केवलमिदं सर्वं दहेयुर्वनं ॥ अत्र वेणूनां परस्पर
संघर्षसंजातदहनसंकुलत्वदोषेण वननाशरूपात्तोषा वर्णितः ॥ गुणेन दोषो यथा ॥
पानार्थिनो मधुकरा यदि कर्णतालैर्दूरीकृताः करिवरेण मदांधबुध्या ॥ तस्यैव गंडयुगमं
डनहानिरेषा भृंगाः पुनर्विकचपद्मवने चरंति ॥ अत्र मधुपानामलंकारित्वगुणेन गजस्य त
त्प्रतिसेवादोषलेनोक्तः ॥ दोषेण गुणो यथा ॥ आघ्रातं परिचुंबितं प्रतिमुहुर्लीढं पुन
श्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथा मा कृथाः ॥ हे सद्रत्न तवैव दैवकुशलं यत्ना
नरेणेहराहतः सारविचारणप्रसिनिना चूर्णीकृतेनास्मना ॥ अत्र वानरस्य चापल्य
दोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः ॥ अत्राद्यंतयोरुदध्नासान्वर्थः मध्यया

स्तुच्छित्तियोगेन लाक्षणिकः ॥९६॥ अवज्ञा गुणदोषाभ्यां न स्यातां चेत् क्रमेण तौ ॥ तौ गुणदो
षौ ॥ एकस्य गुणदोषाभ्यां परस्य चेत् गुणदोषौ न स्यातां तदावज्ञालंकारः ॥ तत्र गुणेन गु
णाभावो यथा ॥ गोविंदमरविंदाक्षं जगदानंददायिनं ॥ अपाह्विपति चेद्धृष्टेन किं तस्य
लाघवं ॥ अत्र नरावकृतेन चेद्धहृद्यासद्गुणाभावः ॥ तद्दोषेण दोषाभावो यथा ॥ हृष्य
सन्मुदितेयस्मिन् सुधांशौ निखिलं जगत् ॥ म्लायंति यदि पद्मानि का हानिस्तस्य वर्ण्य
ते ॥ अत्र पद्मम्लानिदोषेण चंद्रस्य लाघिमदोषाभावः ॥९७॥ दुःखस्याभ्यर्थनानुज्ञा त
स्मिन्नेव सुखसत्तु ॥ यथा ॥ विपदः संतु नः शश्वत् तत्र तत्र जगद्गुरो भवतो दर्शनं यस्यात् अ
पुनर्भवदर्शनं ॥९८॥ प्रतिषेधस्तु सम्प्रोक्तो यः स्यात्तादात्म्यनिर्णयः ॥ अति प्रसिद्धो नि
षेधः ॥ स्वतो नुपयुक्तो यथा प्रत्यंतरं गमीकरोति तदा तेनैव चारुत्वाच्चितोयं प्रतिषेधालं
कारः ॥ यथा ॥ न विषेण न शस्त्रेण नाग्निना न च मृत्युना ॥ अप्रतीकारपारुष्याः स्त्रीभि
रेव स्त्रियः कृताः ॥ अत्र स्त्रीणां विषादिनिर्मितत्वाभावः स्वतस्तरां निर्णीयमानस्तासां कौ
र्ये विषादिभ्योप्यतिशयितामित्येतमर्थं गमीकरोति सचाप्रतीकारत्वेन न व्यक्तीभवति

॥७०॥ असंज्ञात्यतयार्थस्य निष्पत्तिः स्यादसंभवः ॥ यथा ॥ अयं वाराममेको निलय इति
रत्नाकर इति श्रितो मया निःस्वप्रतिपत्तिरलिलमनोऽभिजल्पनिधिः ॥ क एवं जानीते निजक
रपुटीकोटरगतं क्षणादेनं तस्य त्रिमितिकरभरमास्य निमुनिः ॥७१॥ असंगतिर्भवेद्भिन्न
देशत्वे हेतुकार्ययोः ॥ यथा ॥ तवाधरोष्ठे क्षतमंजनं च मम व्यथा न्नर्ममल्लिनं च चेतः ॥ पीनस्तया
लवदनामेव त्वं मत्तः कुतोऽनर्थपरपूरेयं ॥ ७२ ॥ वाञ्छितप्राप्तिकृत्वार्थप्राप्तिस्तु स्याद्विषादनम्
यथा ॥ राज्याभिषेकस्तु चिरं तु जातो रामः प्रभाते सुखयेदयनेनः ॥ इत्थं सुमित्रातनयेन वाणेन
माद्रिलपंक्ति रथोवनाय ॥७३॥ हेतोः कार्यात्मना ख्यानं हेतुरित्यभिधीयते ॥ यथा ॥ अद्रीणां वि
द्रुतिः साक्षाद्राकृष्टिर्जजमुक्तकं वा ॥ स्थैर्यं स्रोतस्वतीनां तनुजीयाद्वंशीध्वनिर्विभोः ॥ अत्राद्रिविद्र
वादो हेतुरपि वंशीनादस्तदाहितरूपतया निबद्धः ॥७४॥ अनुकूल्यैतत्प्रातिकूल्याद्यदि स्यादनु
कूलता ॥ यथा ॥ हा न्यासियमितः पयोधरमरेणापीडितः ॥ पालिजेरा विद्धो दशनैः स्तनाध
रपुटेः श्रोणीतटे नाहतः ॥ हस्तेनानमितः कचे धरसुधापाने न संमोहितः कांतः कामपि तामि
मायतदहो कामस्य वामा गतिः ॥ यथावा ॥ कंसः कृष्णहतः प्राणो मम ज्ञानंद संपदि ॥७५॥ दं

डापूपिकयान्यार्थागमोर्थापत्तिरिष्यते॥मूषकेण दंडश्चेद्भक्षितस्तर्हि तदंतिकस्थापूपा
पि भक्षित एवेत्यपूपभक्षणमर्थादागतमिति न्यायो दंडापूपिका॥यथा॥हारोयं हरिणाक्षीणां
लुंठति स्तनमंडले॥मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः॥यथा वा॥म्लेच्छानामपि चेलां
सि हरंति न भवद्गुणाः॥शुचीनां वेदवेदांतवेत्तृणां का कथा पुनः॥७६॥निश्चयस्तु निषिध्यान्य
त्प्रकृतं चेन्निरूप्यते॥यथा॥हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी
कंठे न सा गरलद्युतिः॥मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा कि
मु धावसि॥अत्र भुजंगादिकमप्रकृतं निषिध्य प्रकृतं मृणाललतादि स्थाप्यते॥यथा वा॥
वदनमिदं न सरोजं नयने नेंदीवरे एते॥इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्य॥७७॥
संदेहः सकृतोयः स्यात् प्रकृतेन्यस्य संशयः॥निश्चयगर्भो निश्चयांतः शुद्धश्च सः॥क्रमे
णोदाः॥किमयमुदितः कथं पृथिव्यां विधुरस्मिन्लयमत्रच्छोलांछनकः॥इह किं चपलाल
चापलं ननु किमु कृष्णः सुमुखः सपीनवासाः॥मुखमस्याः किं कमलं किमिंदुसारेण
निर्मितं धात्रा॥आनंदयति मदक्षिचमरचकोरो यदस्यांतं॥पलाशकुसुमभ्रांत्या शुकतुं

डुपलब्धिः॥ सोपि जंबूफलभ्रांत्यानमलिं धत्तुमिच्छति॥७८॥ सामान्यातिशयतोतस्मिंस्तद्बुद्धि
र्भ्रांतिमानुच्यते॥ यथा॥ त्वन्मूर्त्तिस्फुरितां स्वच्छे साचीस्य हरिवक्षसि॥ सपत्नीभ्रांतितः कां
तिमत्कण्ठेनेत्रयोर्दधौ॥७९॥ सादृश्यानुभवाद्वस्तुस्मृतिः स्यात्स्मरणं मतं॥ यथा॥ सरसां
यं कञ्जं पश्यन्नुस्मार वनितानने॥ यत्र भवन्न वस्तुसंबन्धायदि नाकुत्रचिन्न वेत्॥ कल्प
यत्युपमां प्रोक्ता तदा द्वैधा निदर्शना॥ तत्रासंभवद्वस्तुसंबंधनिबंधना॥ यथा॥ क्वाहं द
रिद्रः पापीयान् क्वायं श्रीपतिरच्युतः॥ तद्बाहुमुपसंयातो निपातः मोरसैधवः॥ अत्र पंचवृ
त्यः षट्पूपा इतिवदन्वयोऽसंभवन्नुक्ता। वाक्यार्थयोर्विंबप्रतिविंबभावं कल्पयति॥ सच द
रिद्रस्य ममश्रीकान्तसाक्षात्कारस्तत्पार्श्वस्य गंगां संगमइवेति॥ यथा वा॥ आज्ञाभंगो नरेन्द्रा
णां विप्राणां मानखंडनं॥ पृथक्सय्या वरस्त्रीणामशस्त्रविहितो वधः॥ अत्रापि नृपाज्ञाभंगा
दिकस्य मशस्त्रकृतवधतुल्यमिति सद्भावमावेदयति॥ यथा वा॥ सुन्दुत्वद्वदनं धत्ते लीला
पीयूषदीधितेः॥ अत्र कथमन्यस्यान्यलीलाधारणमिति सादृश्ये पर्यवसानं॥ अथ संभवद्वस्तु
व॥ सच विधुकनकेरवविकाशस्य संपन्नकृतसुहृत्त्वसादृश्यं चनज्ञावमावेदयति॥८१

काव्यको.
५२

समुच्चयस्तु सार्द्धं चेत्सतं स्यं कत्रदेतवः गुणौ क्रिये वा युगपत्स्यां तां किं वा गुणक्रिये॥ ब
हूनि कारणानि यदि खले कपोतन्यायेनैकस्मिन्कार्ये साहिताः पतंति यदि वा गुणौ क्रि
ये गुणक्रिये गुणक्रिये च युगपत् युगपन्निबध्येते तदा समुच्चयश्चतुर्धा॥ क्रमेणोदा॥ कुलं रू
पं वयो विद्या धनं च मदयत्यमुमु॥ मधुरं च वचस्तस्य विशदं च मनो मम॥ गतश्च मथुरां कृ
ष्णः विप्रविष्टश्च हृदि ज्वरः॥ रक्तं च नलिनो वक्त्रं सकंपश्च समुद्दिकः॥ (२)॥ नवेत्यरि
करो नाम साकूतं चेद्विशेषणं॥ उदा॥ अमेधप्रतिजातस्य विदूपात्रस्य विनाशिनः॥ वपु
षः॥ परिपोषाय मूढाः पापानि कुर्वते॥ अत्र विशेषणानि सर्वथा विशेष्यापोषत्वाभि
प्रायगर्भाणि॥ यथा वा॥ एष लक्ष्मीपतिः कृष्णो दारिद्र्यमेपनेष्यति॥ अत्र लक्ष्मीपतिरि
ति विशेषणे दैन्यविनाशसामर्थ्याभिप्रायगर्भं॥ (३)॥ साकूतत्वे विशेष्यस्य मतः परिक
रांकुरः॥ यथा॥ लिखितुं कार्त्तवीर्यस्ते वित्तीर्मघवेक्षितुं॥ चक्रं शेषः प्रभुर्नैमन
काहमेष कृताः पुनः॥ अत्र कार्त्तवीर्य इत्यादीनि विशेष्याणि सहस्रबाहुत्वाद्यभिप्रायग
र्भाणि॥ सूक्ष्मं लोकृतचेष्टाचेत् स्याकूतज्ञे प्रकाश्यते॥ स्यानि जायानिज्ञं प्रति यदि तद्दा

कृतमंजकं चेष्टितं प्रटतिनितदीधनायप्रकाश्यते ॥ तदा सूक्ष्मं नाम ॥ यथा ॥ ललाटलग्नानलकान्सम
मीक्ष्य सखीसमक्षमाश्वतुरा प्रजाते ॥ लिलेख तस्याः सशरं मृगास्याः शरासनं पाणिसरोजयोः सा ॥
अत्र सखीकृताभिज्ञायानायिकायाः पाणौ धनुर्बाणलिखनरूपं चेष्टितं त्वयापुरुषबल्लिशिचेष्टितमि
त्याकूतं पृष्टयाः खलु धनुर्वाणन्तो यज्ञ्वंति ॥ यथा वा ॥ कांतेमायांतमालोक्य मंदिरे चंद्रिराननना
चकार करकंजस्य कुड्मलीभावमुत्सुका ॥ अत्र संकेतसमयावबोधाय गतेनिजाकृतस्तेन तदितरबो
धकमिदं चेष्टितं ॥ रात्रिस्तत्समयइत्याकूतं ॥ ७५ ॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदीर्य्यते ॥ वाक्या
र्थः पदार्थो वा यदि हेतुः स्यात्तदा काव्यलिंगं ॥ क्रमेणोदा- ॥ यः कीर्त्तयति गोविंदं संसारस्तस्य नश्य
ति ॥ स्वर्गग्रामटिकाविछेन्नाविंदार्पितमानसः ॥ ७६ ॥ ननु वाक्यार्थगतेन काव्यलिंगेन कार्य्यका
रणभाववीयोर्थान्तरन्यासश्चरितार्थोस्तुमैवं ॥ हेतुरत्र त्रिविधः ॥ निष्पादकः समर्थको ज्ञापक
श्चेति ॥ आद्यः काव्यलिंगस्य विषयः ॥ द्वितीयोर्थान्तरन्यासस्य ॥ तृतीयस्त्वनुमानस्येति पृथगे
व काव्यलिंगात्तज्ज्ञावीयः सः ॥ ७७ ॥ विकल्पस्तुल्यबलयोर्विरोधे चातुरीजुषि ॥ यथा ॥ पतत्यवि
रतं वारि नृत्यंति च शिखंडिनः ॥ अद्य कांतः कृतान्तो वा दुःखस्यांतं करिष्यति ॥ यथा ॥ पतत्य

काव्यको॰ ५३

विसतं वारि नृश्वसंति च शिशिरं वदन्ति नैः॥ अत्र प्रक्रांत क्रमं तत कर्त्तव्ययोर्दुःखनाशयोर्युगपज्ज्ञाता संज
वाद्विरोधः॥ तुल्यबलत्वं च तयोः स्पर्द्धया संजायमानत्वात्॥ कांता यद्यागच्छेत्तदा मरणे
नाशश्चेन्मरणे तु कांतागमासंभवः इत्युभयोः स्पृहायां विकल्पः। श्लेषगर्भत्वाच्चातुर्यमृ॥ यथा
वा॥ युष्मांकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरः॥ दीयतामुर्जितं वित्तं देवाय ब्राह्मणाय वेत्य
त्र नायमलंकारः॥ चातुर्याभावात्॥ ८७॥ रत्नावली क्रमाध्यक्तिः स्मृता साहित्यशालिनां॥ उ
दा॰ महापद्मः पद्मार्चितचरणः शंखांचितकरः अवोन्नृपानास्त्वन्मकरविलसत्कच्छपवपुः मु
कुंदः सकुंदस्तुलशादननीलोरुचिनराद्धलिध्याजात्स्वर्णहृदि निवसदेवप्रणयिनां॥ अत्र प्रास
द्धसहभावानयांवापि निधयः क्रमाद्धशिताः॥ एवं तथा नेताः सिध्याद्यापुरदाहार्यां॥ ८८
पूर्वं पूर्वं प्रति स्याच्चेदूर्ध्वमूर्ध्वविशेषणं॥ स्थाप्यं सत् खटन्यमानं वा तदात्वेकावली मेवेत्॥ उत्त
रोत्तरस्य पूर्वपूर्वविशेषणभावेन स्थापनं खंडनं वा यदि भवेत्तदा द्विभेदा एकावली स्यात्
क्रमेणोदा॰॥ हंसावनं हिमलतापरीतं लताश्च पुष्पस्फुरितास्य नाजः॥ पुष्पाण्यपि स्फीतमम
धुव्रतानि मधुव्रताश्च श्रुतिहारियुंजाः॥ अत्र पूर्वपूर्वविशेषण तयोत्तरोत्तरस्य स्थापनं॥

न तज्जलं यन्न सुचारुपंकजं न पंकजं तद्यदलीनषट्पदम्॥ न षट्पदोसौ न जुगुंज यः॥ क
लं न गुंजितं तन्न जहार यन्मनः॥ अत्र पूर्वपूर्वविशेषणेनोत्तरोत्तरस्य निरासः॥ ८९॥ व्या घातस्त्वन्यथाकारि
तद्व्या घातः श्लोकयथा साधनप्रसिद्धं तच्चेत् केनचिद्विरुद्धसाधनं क्रियेत तदेत्यर्थः॥ यथा॥ दृक् थाकारिकृतं यदि॥ त
पातनिहितं कामं दृक्पातैर्जीवयन्ति याः॥ गोह्यापि विनवस्नेहास्ताः स्तुवे गोपसुभ्रुवः॥ व्य थाकारि साधनं यद्य
घातः॥ सीते मदुस्त्वं नमया सहाटवीचलेति नन्वागदितात माहसा॥ दवारविंदास्वचलाम्य न्यथाकारिकृतं तस्या
हं पुरामदीविचित्रां नवतां सहाटवीम्॥ ९०॥ गुंफः कारणमालास्याद्यथा प्रक्रान्तहेतुभिः॥
उत्तरोत्तरहेतुभूतपूर्वपूर्वैः॥ पूर्वपूर्वहेतुभूतोत्तरोत्तरैर्वा वस्तुनिर्बद्धिर्गुंफः स्यात्तदा कारण
माला॥ क्रमेणोदा॥ सत्संगाद्वैराग्यं वैराग्याच्चित्तशुद्धिरात्मज्ञानं वेतत्॥ पुंसां सच्चित्तविशुद्ध्यात्मा
दमुक्तिः॥ प्रकाशते नगवान्नवंति नकाः पापान्यपापं दारिद्र्यं संनवं दारिद्र्यमप्रदानेन त
स्माद्दानपरो भवेत्॥ ९१॥ आक्षेपश्चेद्वक्तुमिष्टस्तु निषेधश्चेद्वक्तुमिष्टस्य वस्तुनः॥ विशेषं व
क्तुमितिशेषः॥ यथा॥ सखि विरहे वनमाली विलोकयन्तं त्वयाहारं॥ हंत नितांतमिदानीं नि
र्दयहृदि किं वदाम्यहं॥ अत्र हरिविरहदुःखस्य विवक्षितस्य प्रतिषेधः॥ त्वां विना सोन

भविष्यतीति तस्य विशेषो विवक्षितः ॥ यथा वा ॥ नवनीतनिभा राधा बाधा स्मरशराग्नि
जा ॥ निर्दयस्त्वमिदानीं मं किं वा न क्षमहे वयम् ॥ अत्र राधाविरहवेदनाया विरुद्धवह्नितायाः
प्रतिषेधः ॥ अथ शाब्दिकरत्वं तु तस्या विशेषो वक्तुमिष्टः ॥ वक्ष्यमाणोक्तविषयतयास्येव
स्य द्विविधस्य स्तनवाक्यस्य वासो निरूपितः ॥९२॥ ललितं वै प्रस्तुतवर्ण्ये वाक्यार्थप्रतिबिम्बनं
अप्रस्तुतधर्मिणि यो वर्णनीयवाक्यार्थस्तमवर्णयित्वा तत्रैव तद्रूपस्य कस्यचिदप्रस्तुतवा
क्यार्थस्य वर्णनं ललितं ॥ यथा ॥ अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य
त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा ॥ नलं प्रत्येतद्वाक्यं ॥ अत्र कतमो देश
स्त्वया परित्यक्त इति प्रस्तुतार्थमुपन्यस्यैव वसन्तमुक्तस्य वनस्य दशामनायीति तत्प्रतिबिंब
भूतार्थमात्रोपन्यासो ललितमलंकारः ॥९३॥ रसादीनां रसांगत्वे रसवत्परिकीर्त्यते ॥
॥ यथा ॥ कान्तश्रवोन्तइत्यादि ॥ अत्र हास्यांगं शृंगारः ॥ यथा वा ॥ मुनिर्जयति योगीन्द्रो महात्मा कुं
भसंभवः ॥ येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥ अत्र मुनिविषयकभावांगमद्भुतः ॥
९४॥ भावस्य चेदंगतां याति रसादेः प्रेय उच्यते ॥ यथा ॥ चेतो मदीयं चिकुरे नियत्समित्यादि ॥

॥ अत्र स्मृतिरूपो भावो विप्रलंभांगं ॥ ९५ ॥ तदूर्जस्वि रसाद्यं चेदंगता भासयोर्नवत् ॥ यथा ॥ लु
ल्लैनिकहतान् दारान् पुनः प्राप्य लसाद्यया ॥ मुदितैर्मथुरानाथवंद्यसशाद्रवरैः ॥ अत्र श
त्रुस्तुतिरूपो भावो भासो नगरवद्विषयस्य भावस्यांगं ॥ ९६ ॥ अंगं रसादो भावस्य प्रशमश्चेत्स
माहितं ॥ यथा ॥ देवेंद्रजित्सुपृथुकात् पृथुकोपमाञ्जीरस्मात्सुसत्सुनतवैतिगिरासुराणां ॥
कंसस्य योहद्दिमदः सनुतेषु सर्वेष्वाप्तेष्वृत तत्पृथुकतां कगतो न जाने ॥ अत्र मद प्रशमस्त्वस्यां
गं ॥ ९७ ॥ भावोदयादेरंगत्वे कथितास्तत्त्वनद्राकया ॥ भावोदय भावसंधि भावशावल्याख्यास्त्र
यो लंकाराः ॥ यथा ॥ मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः ॥ श्रुत्वा कुतोपि त्वन्नाम लेभिरे विश
मदशां ॥ अत्र राजविषयकभावांगं त्रासोदयः एवमन्यत् ॥ ९८ ॥ ९९ ॥ १०० अथ प्रमाणालंका
राः ॥ प्रमाणजन्या प्रमितिः प्रमाणालंकृतिः ॥ स्मृताः ॥ तत्र प्रत्यक्षं ॥ यथा ॥ कल्पवाक्यान्म
दुस्पर्शात् सारत्याद्दघरासवात् ॥ सौरभाच्चापि मेतच्चिद्रसीदियपंचकं ॥ अत्रेंद्रियज्ञत्वा
जन्यं प्रत्यक्षमलंकारः ॥ यथावा ॥ आसनूपच्छाकरे स्त्रीणामित्यादि ॥ अत्र प्रमानेतरं चास्तु
यंतत् ॥ १०१ ॥ अथानुमानं ॥ यथा ॥ जानीमहे स्याहृदि सारसाक्ष्या विराजतेंतः प्रियवक्त्रचंद्रं

दः तत्कान्तिजालैः प्रसृतैस्तदङ्गे गोष्ठान्तराकुद्मलतामिवाप्ते ॥ अस्याहृदयं प्रियवदनचं
द्रवदिति रूपकविच्छित्तिसमाश्रयानुमितिरलंकारः ॥ वह्निमान् धूमादित्यादौ तु नायं विच्छित्ति
विरह इति ॥ १०२ ॥ अथोपमानं ॥ यथा ॥ तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले ॥ यस्त
न्वि तारकान्यासः शकटाकारमाश्रितः ॥ अत्रोपमानमूलमतिदेशवाक्यं ॥ शकटाका
रा रोहिणीत्युपमितिः ॥ १०३ ॥ अथ शब्दः ॥ वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं सृष्टि
स्थितिप्रलयकारणमामनन्ति ॥ तस्यामसुन्दरमचिन्त्यमात्ममूर्त्तिं सर्वेश्वरं प्रणतिमात्रव
शं नताः स्मः ॥ अत्र निर्विकारचैतन्यमूर्त्तिरीश्वरो जगद्धेतुरित्यत्र श्रुत्यादिप्रमाणमुक्तं तज्ज
न्या शब्दप्रमितिः ॥ एवमाचारविषयाः स्मृतयः श्रुतिलिङ्गादयश्च षट् बोध्याः ॥ १०४ ॥ अथा
र्थापत्तिः ॥ निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ॥ अन्यथानोपपद्येत पयोधरभरस्थितिः
अत्र कुचस्थित्यन्यथानुपपत्तिप्रमाणवार्थापत्तिर्मध्यसत्त्वप्रमाणमिति ॥ तज्जन्यश्च स्वरूपाप्र
मितिः ॥ १०५ ॥ अथानुपलब्धिः ॥ यथा ॥ स्फुटमसदवलग्नं तन्वि निश्चिन्वते ते तदनुपल
म्भमानास्तर्कयन्तो विलोकाः ॥ कुचगिरिवरयुग्मं यद्विना धारमास्ते तदिह मकरकेतो

रिंद्रजालं प्रतीमः ॥ अत्र मध्यानुपलब्धिर्मध्याभावे प्रमाणं ॥ ततो मध्यं नास्तीति प्रमितिः ॥१०६॥
अथ संभवः ॥ स च सहस्त्रेषु शतं संभवतीति बुद्धौ संभावना यथा ॥ ये नाम केचिदिह नः प्रथयंत्यव
ज्ञां जानंति ते किमपि तान्प्रति नैष यत्नः ॥ उत्पत्स्यतेऽस्ति मम कोपि समानधर्मा कालो ह्ययं नि
रवधिर्विपुला च पृथ्वी ॥ अत्र समानधर्मविशिष्टस्य जनस्योत्पत्तिस्थिती संभवती संभवत्वेन
प्रमाणेन सिध्यतस्तु द्वयमादिके च कालानंत्यपृथ्वीवैपुल्ये भवतः ॥१०७॥ अथैतिह्यं ॥ तच्चाज्ञा
तवक्तृकैकं पारंपर्यं प्रसिद्धमेव ॥ यथेह तरौ यक्षो निवसतीति ॥ श्रद्धा ॥ कल्याणी बत गाथेयं लौ
किकी प्रतिभाति मे ॥ एति जीवंतमानंदो नरं वर्षशतादपि ॥ इह लौकिकी गाथेति निर्दिष्टवक्तृ
कं प्रवादपारंपर्यमुक्तं ॥१०८॥ अथ पूर्वोक्तैरनुप्रासाद्यैरितिसांतैरलंकारैः ॥ संसृष्टिसंक
रौ नाम स्यातां ॥ यथा मणिसुवर्णादिसंयोगे चारुत्वातिशयी पृथगलंकारस्तथानुप्रासोप
मादिसंयोगे संसृष्टिः संकरश्च तादृक्पृथगलंकारो नृसिंहाकारवपुः संसृष्टौ तिलतंडुलन्याये
न संकरे तु क्षीरनीरन्यायेनालंकारयोगाः ॥ तथा हि ॥ सा स्यात्संसृष्टिरेतेषां पृथगेकतया ।
स्थितिः ॥ एवंस्थितानामलंकाराणामेकस्मिन्काव्ये मिथो निरपेक्षा स्थितिः ॥ संसृष्टिः यथा ॥

काव्यको स्फुटः पायादपायान्नः पूर्णेन्दुसदृशाननः ॥ नन्दहृत्सरसीहंसः केशवंशनिसूदनः ॥ अत्र
९६ त्र पायादपायादिति यमकं केशवंशेत्यनुप्रासः अनयोः संसृष्टिः पूर्णेति नन्देति चोपमारू
पकयोः एवं संसृष्टयोरस्या साबाध्या ॥ यथा वा ॥ हृद्यावनद्धमतल्लेषु गवां व्रजेषु वेद्यावसानसम
येषु च मृगपतेर्नन ॥ न वेणुवादनपरे शिखिपिच्छचूडं ब्रह्म स्मरामि कमलेक्षणमभ्रनीलं ॥
अत्र पूर्वार्द्धे तुल्ययोगिता तुर्यपादे लुप्तोपमानयोः संसृष्टिः ॥१०९॥ स्थितिरंगांगिभावेन तदेके
काश्रयेण च तत् संदिग्धत्वेन चैतेषां तत्स्यात् संकरस्त्रिधा ॥ तत्रांगांगिभावेन स्थितिर्यथा
वदनमृगांके सुदृशो वहति सितसत्रमालिकां वीस्य ॥ उदितेऽपि शुक्तिकाकी विशंकया सोऽप्रवे
पतेरात्रेः ॥ अत्र रूपकमंगी गम्यान्तिमानं गी ॥ यथा वा ॥ अनुरागवती संध्येत्यादि ॥ अत्र स
मासोक्तिर्विशेषोक्तेरंगं ॥ एकाश्रयेणेन स्थितिर्यथा ॥ राजते रघुवंशस्य कीर्त्तिः कुंदेंदुसुंद
री ॥ अत्र व्यतिरेकछेकानुप्रासयोरेकपदाश्रयत्वेन स्थितिः ॥ यथा वा ॥ नदः किमकराश्लि
न्नः स एव वं मया दृष्टं ॥ यशोदा च मत्ता नागा पयो यस्यास्तनं हरिः ॥ यस्य नंदस्यास्तनं शाद्वं
वा कचं पयो घालितवानिति प्रथमार्थः ॥ अत्र अनुमानश्लेषयोरेकपादाश्रयत्वेन स्थि

त्तिः॥ संदिग्धत्वेन स्थितिर्यथा मुखं वा को नव पश्यामो हृशानघुतिस्तु करे॥ अत्र रूपकमुपमा वेत्य
निश्चयात् संदेहः॥ एकतरस्य बाधकानुपलंभात्॥ यथा वा॥ हरोन्मौ संध्यामित इत्यादि॥ अत्र विशेषो
क्तिविभावनयोः संदेहेन संकरः॥ अनुकूलार्थांतरन्यासयोस्तयोश्चैकाश्रयेणावस्थितत्वाच
मः एकतरस्योक्तेरूपत्वेनेतु न संदेहसंकरः॥ यथा॥ त्वं वेदृश्रीकरस्याहि मुकुंजं दकरं खेके
जं॥ यथा वा॥ लौविद्वास्करसंज्ञासमालिंगितिसर्वहा॥ अत्रालिंगनमुपमायां बाधकं॥ सत्यो
पतितुल्यत्वेन स्यात्संनयात् ॥१०१॥ अथैषामलंकाराणां केचन सामूहदोषाः॥ संतितेत्रके पुष्टोप
घल्लेत्त्वेविव्यदः॥ पृथग्जनतोस्यते॥ तथाहि॥ वैकल्प्यमपसिद्धीरीत्यायोग्यता चानुप्रासस्य दोषाः॥
सचापुष्टार्थत्वमप्रसिद्धिविरोधः प्रतिकूलाक्षरत्वं च क्रमात्॥ क्रमेणोदाः॥ सुंदरोनंदपुत्रो सौकं
सत्वं दशनाशनः॥ अत्रानुप्रासो वाच्योपायकत्वादिफलः॥ हृत्तरकाणां संतदः॥ कुंदेंदुप्रति
प्रतिमावनो॥ अत्र सर्वेषां देवानां शोभ्यमप्रसिद्धं॥ शिखंडिनां नवे नामा कोडमकांडे विखं
डिता॥ अत्र शृंगारगौडीरीतिरप्रयुक्तता॥ यमकस्य त्रिपाद्यां स्थितिरप्रयुक्ता॥ यथा॥ सार
संतत्रयपश्यंती सारसेनवयो बभूः॥ प्रयसिश्रीहरो मुक्तः सारसं प्रत्यपद्यत॥ उपमायामसादृ

काव्यकौ॰ श्यासंनवानुचिंतार्थता ॥ क्रमेणोदा॰ ॥ हंसैः करीव निर्जाति विधुवत्पांडुरं वचः ॥ अत्र मरा १२००
लगजयोः सादृश्यं नास्ति वचसि सोल्लयमसंभवि ॥ उपमानस्य जाति प्रमाणगतेन न्यूनत्वाधिं
४७ क्ये न तथा ॥ क्रमेणोदा॰ ॥ विप्रोयं सर्वदा दीर्घो दधिविंदुनिभो विधुः ॥ अत्र जाति प्रमाणेन न्य
न्यूनता दीर्घायुर्द्रोणिवत् काकोवेलीयं यमुनोपमा ॥ अत्र जाति प्रमाणेन चाधिक्यं ॥ नव प्र
नः संप्रति काव्यकौस्तुभः प्रज्ञाति विघ्नेक विम्र घरोनयः ॥ आलोकतस्तस्य जनैः सुबुद्धिभिः
परीक्षतामेव नु काव्यरूपः ॥ ॥१०॥ विद्यास्वयं गदितं गदितं तं च काव्यकौस्तुभं विश्वतु ॥ ति
ष्ठति यदि कमनीयो नमनीयो सो न किं सहेसि ॥ २ ॥ ॥ इति काव्यकौस्तुभे शब्दार्थलिं
कारनिर्णयो नाम नवमी प्रभा ॥ ९ ॥ ॥ संवत् १८३१ ना द१६ शुक्र पति यतियो जो म ॥
शुभं भूयात् ॥ लिखितं नेदं कौश्वर ब्राह्मण ब्रह्मपुरी मध्ये ॥ ॥ ॥

११ ॥